साम्प्रतसंस्कृतसाहित्ये यथार्थनिरूपणम् : समस्याः सम्भावनाश्च

हर्षदेवमाधवः

विमर्शनात्मके प्रबन्धेऽस्मिन् साम्प्रतसंस्कृतसाहित्ये यथार्थनिरूपणं कथमस्तीति निरूप्यते। अत्र पत्रमञ्जूषा, काक्षेण वीक्षितं, मृगया इत्याद्याधुनिकरचानाभ्यः सन्दर्भान् उद्धृत्य यथार्थनिरूपणप्रकारः विमृश्यते।

व्यावहारिकस्य चिरपरिचितस्य दैनिकजीवनस्य नानावृत्तान्तानां कृतौ सरलायां, लोकव्यवहारप्रयुक्तायां शैल्यां निरूपणं यथार्थवादो वास्तववादो वा कथ्यते साहित्ये। अस्मिन् वादे–

(१) भाषया सारल्यम्

(२) घटनानां सूक्ष्मनिरूपणम्

(३) वार्णनेषु सत्याभासः (Veri similitude)

(४) नितान्तमावश्यकानि तत्त्वानि सन्ति।

(५) अस्य वादस्य पुरस्कर्तारः कवि-लेखका मध्यमनिम्नवर्गमयस्य समाजस्य निरूपणं कुर्वन्ति।

(६) अत्र मध्यमनिम्नवर्गस्य निराशानां, वैफल्यस्य, उपेक्षायाश्चित्रणं भवति।

आङ्ग्लभाषायां चार्ल्स डिकन्स–बाल्झाक-एमिल झोला तोल्स्तोय्प्रभृतीनां साहित्यस्य मूल्याङ्कनम् अनेन वादेनैव कर्तुं शक्यमस्ति।[१]

सामाजिको वास्तववादः (Social Realism)

अयं वादः साम्यवादप्रचारार्थं रश्यादेशे समुत्प.ा:। अन्यसाम्यवादिनां देशेऽस्य प्रचारो जातः। अयं वादः कलाकारं सर्जकं वा समाजवादि-राज्यस्य (socialist)

प्राणभूतमङ्गं मन्यते। समाजवादयुक्ते समाजे ये ये प्रश्नाः वर्तन्ते तेषां निरूपणमत्र कलाकारस्य च सर्जकस्य प्रधानध्येयमस्ति।

निसर्गवादस्य प्रतिक्रियारूपेण वादोऽयं प्रेक्ष्यते समीक्षकैः।[२]

वास्तववादस्य सम्बन्धः वास्तविकतया भवति। अत्र यथार्थनिरूपणं स्वभावोक्त्या क्रियते। तत्त्वज्ञाने वास्तविकताया अर्थः अन्य एव भवतीति प्रसिद्धम्। स्वभावोक्तिमार्गेण गन्तुमौचित्यमपि आवश्यकं वर्तते, स्वभावोक्तिः केवलमभिधा न भवेदित्यपि कविना चिन्तितव्यम्।

अतो निम्नलिखिता विचारा अवधेयाः।

(१) कलायाः कार्यं विश्ववास्तवस्य विश्वसनीयमालेखनं भवति, सत्यम् एवं निकषरूपेण वर्तते।

(२) जनलीवनस्य प्रश्नाः साहित्ये निर्भयतया प्रस्तोतव्याः।

(३) सामाजिक-आर्थिक धार्मिक लौकिकविषमतानां चित्रणमावश्यकम्।

(४) निम्नवर्गीयसमाजस्य सुखदुःखपूर्णाभिः कथाभिः संवेदनाया हृदयविदारकाऽनुभूतिः क्रियते।

(५) सामाजिक्या अभिज्ञतायाः प्रकटीकरणम्।

(६) जवजीवनस्य कुत्सित क्षुद्र-तुच्छाश्लीलाशानां स्पष्टशब्दैर्व्रर्णनम्। जातीयजीवनप्रश्नानां प्रगल्भं निरूपणं वास्तववादस्य विषयोऽस्ति।[३]

(७) वास्तववादाय अनेके पर्यायाः प्रयुज्यन्ते। यथा—

(1) Naive Realism (2) Naturalist Realism (3) Poetic Realism (4) Psychological Realism (5) Dynamic Realism (6) New Realism (7) Subjective Realism (8) Objective Realism (9) Socialist Realism (10) Conscious Realism.

(८) साहित्यकारेण बहिर्विश्वस्य वास्तविकतायाः पुननिर्माणं न कर्तव्यम्, किन्तु कृतावेव अपूर्वाया वास्तविकताया सर्जनं कर्तव्यमस्ति।

(९) परिवर्तितसमाजस्य परिवर्तित रीति-संस्कार-विचारधारा-भावावेगानां निरूपणं यथार्थिवादस्य ध्येयमस्ति।

(१०) साहित्यकारः कोमललितपदावलीत्यागपूर्वकं कर्कश-तिक्त-वास्तवपा श्र्ववर्तिन्या भाषया वरणं करोति।

(११) यन्त्रप्रसूताया जीवनशैल्या यान्त्रिकीकरणं, सामान्यजनदुर्दशा, नगरसभ्यताया दूषणानि-इत्यादयो विषयाः सन्ति।

(१२) यन्त्रप्रसूताया जीवनशैल्या यान्त्रिकीकरणं, सामान्यजनदुर्दशा, नगरसभ्यताया दूषणानि-इत्यादयो विषयाः सन्ति।

(१३) उपेक्षित- समाजं प्रति करुणाशीलतया सर्जकस्य मानवतायुक्तः स्वरः श्रोतुं शक्योऽत्र।

संस्कृते केशवचन्द्रदाश-बनमालीबिश्वाल-कलानाथशास्त्रि-नारायणदाश-राजेन्द्रमिश्र-राधावल्लभादीनां गद्यसाहित्ये, नागार्जुन राधावल्लभ-हर्षदेवमाधव-पद्मशास्त्रि-रामदेव-रमाकान्शुक्ल-वनमाली वि श्वालादीनां काव्येषु वास्तवयुता रचनाधर्मिता दरीदृश्यते।

वस्तुतः काव्यत्वमपि स्यात्। यथा–

आग्रामात् सरकं न यावदासीत् तावच्च दुःखं परं सरकं तूपगतं च तदनुलग्ना विपणिस्तमासादिता। वृत्तिस्तत्सदृशी च तयोपेता सर्वं तुलातोलनी।।[४]

अन्यत् स्वभावोक्तिपूर्णं चित्रं पश्यतु–

स्वखलदक्षरमालाभिर्लुलुलितमसीबिन्दुभिर्व्याप्तम्।
लिखितं स्वयमानीतं लगुडकरेणानतगात्रेण।।

वृद्धेन व्याकुलितां दृष्टिं क्षिपता वेपथुमताऽस्याम्।
पत्रं मञ्जूषायां क्षिप्तं हस्तेन कम्पितेन।।[५]

वर्तमानकाले सर्ववस्तूनां व्यापारीकरणं भवति। मनुष्यजीवनमपि, मनुष्यास्तित्वमपि विपणौ क्रेतव्यं वस्तु सञ्जातम्। पश्यतु काव्यमेकं गजलविधायाम्।

विक्रयार्थं समागततो विपणौ।
निष्क्रयार्थं समागतो विपणौ।।

नैव जाने महार्घतां स्वायाम्।
यन्निमितं प्रचारितो विपणौ।।

को नु मां क्रेष्यतीह कैर्मूल्यैः?
वेद्मि नाहं, प्रदर्शितो विपणौ।।

ब्राह्मणो वा वृणोतु चाण्डालः।
स्यामुभाभ्यां समादृतो विपणौ।
स्वाभिमानस्य सङ्कथा व्यथा।
नैष पन्थाः समर्थितो विपणौ।।

स्वर्णशाकावुभावति क्षणिकौ।
आशु विक्रीयते यतो विपणौ।।

अत्र घटतेऽखिलं झटित्येव
प्राग्विचारो न दृश्यते विपणौ।।

स्वैरमुत्सार्यतेऽत्र सत्पुरुषः।
लम्पटो भाति सत्कृतो विपणौ।।

क्वापरत्रार्थसिद्धिरार्तानाम्।
काङ्क्ष्यतेऽथो गवेषितो विपणौ।।

('अभिराज' डॉ. राजेन्द्रमिश्रस्य)

कदाचिद् वक्रोक्तिमार्गेण लक्षणायाः प्रयोगेन यथार्थस्य चित्रणं भवति। यथा–

विक्रय :...Sate . . . **विक्रयः**
अत्र लभ्यते विना ह्रूं
किलोमितेन क्रयणेन सह
सार्धकिलोमिता वञ्चना।
सर्वकारनियुक्त्या सह
कार्यचौर्यं विना मूल्यम्
अपि च
उत्कोचलाभोऽपि निः शुल्कः संयुक्तोऽस्ति।
निर्वाचने
विजयेन सह
भ्रष्टाचारस्य वर्तत उपहारयोजना।
परीक्षाप्रमाणपत्रैः सह

सङ्गताऽस्ति
वृत्तिप्राप्त्यर्थं चिन्ता।
भवान् जानात्येव यत्
मानवताया नास्ति मूल्यम्

अतः
विक्रयकाले क्षिप्ता सा मार्गे।
यदि भवते रुचिता स्यात् . . . . . ।।[6]

कदाचिद् व्यञ्जनायाः प्रयोगेन वैचित्र्यमार्गण 'सन्निधि' प्रयोगण वा (श्रनगजं चवेपेपवद) यथार्थनिरूपणं मार्मिकं भवति। यथा 'रावणराज्यम्' 'मानचित्रपूरणप्रश्नः' इत्यादिषु काव्येषु।[7]

समस्या : यथा वास्तवनिरूपणं शन्दैरेवाभिधया क्रियते तदा वास्तवस्य चित्रणम् अनाकर्षकं भवति, कदाचित् कविरुपदेशको धर्मगुरुर्भवति, काव्यत्वं शब्देभ्यः स्रंसते। यथा–

पर्याप्तं वरपितृवाञ्छितधनं दातुं न शक्तो यदि
पुत्री तस्य चिरं विवाहविधितो लोके भवेद् वञ्चिता।
देशेऽस्मिन्नपरत्र यापि बहुशः पित्रोर्व्यथा पीडिताः
कन्याः काश्चिदसून् स्वयं जनिगृहे मुञ्चन्ति पाशावृताः।।

एवं स्वतन्त्रे खलु भारते या
कुरीतिरेषा प्रसृता प्रचण्डा।
तस्याः समूलोद्धरणाय लोको
लोके श्वर श्चापि प्रबोधनीयौ।।

(विद्याशङ्कर त्रिपाठी', स्वतन्त्रभारते भयावहा यौतुकप्रथा)[8]

कदाचिद् प्रतिभया रहितं वास्तवनिरूपणं बाललेखनवल्लक्ष्यते। तत्र न काव्यगुणाः तत्र न काव्यगुणाः, न काचिच्चमत्कृतिः, न वक्रोक्तिरपि भवति। यथा–

वायोर्विकाराच्छ्वसनस्य दोषा–
स्तीक्ष्णध्वनि श्चेद् बधिरा भवन्ति।
अन्नेन दृष्टेन मलस्य पीडा
व्याधेर्विकासो हि शरीरनाशः।।[9]

(केशवरामशर्मणः 'पर्यावरणम्' कृतौ)

हरिश्चन्द्र-रेणापुरकरस्य नैकासु रचनासु साम्प्रतविश्वस्य वैखर्यां निरूपणे न काव्यत्वं स्पन्दते। एवं बहबः कवयः साम्प्रतघटनावर्णनेन काव्यत्वसिद्धिमभिलषन्ति। किन्तु प्रत्येकं वारं तत्क्षणमेव रचनापटुत्वे काव्यत्वं विस्मर्यते। साम्प्रतवास्तवस्य, घटनानां वा शब्देहं विधातुं कविना प्रतीक्षा कर्तव्यैव। अन्यथा अनुभूतयः चिरस्थायिन्यो न भवेयुः। यथा–

विमानापहारेच्छयाऽऽरुह्य यानं
नृशसैः समेषां कृतं दिक्पिधानम्।
तथाऽत्रासयन् यात्रिकान् स्वार्थलीनाः
न शक्या दशा वर्णनीयाऽतिदीना।।

('कमलापाण्डेया' विमानापहरणम्।)[10]

अत्र यदि गद्ये पङ्क्तयः स्युस्तदा अभिधाया एव प्रभुत्वस्य अनुभवः स्यात्। अत्र घटनायाः सामान्यवर्णनमेवास्ति। एवमेव सामयिकेषु असङ्ख्य रचना वास्तवस्य नितान्तंनिरूपणं कृत्वा तुष्टिं लभन्ते। अस्मिन् प्रचञ्चे संस्कृतस्य प्रमुखाः कवयोऽपि वशीभूता वर्तन्ते। गेयता वा छन्दोनैपुण्येन काव्यत्वं न जायते।

कदाचिदतिसरलशैल्यां वास्तवनिरूपणे काव्यत्वं जायते। यथा तेलुगुकाव्यमेकम्–

शैशवे
पुत्तलिकाया माता भूत्वा प्रसन्नाऽभवम्।
अधुना त्वहं
माता च पुत्तलिका चास्मि।[11]

(अञ्ज्नायाः काव्यमिदम्)

संस्कृतकविभिर्वास्तवस्य निरूपणं कौशल्येन सावधानतया च कर्तव्यमितिमे मतिः।

सन्दर्भ

१. टोपीवाला डॉ. चन्द्रकान्तः, परेशनायकः, हर्षवदनः त्रिवेदी 'आधुनिक साहित्य संज्ञा कोश' गुजराती साहित्य परिषद, अमदावादम् १९८६: पृ. २१२
२. आधुनिक साहित्यसंज्ञा कोशः पृ २२४
३. प्रमोदकुमारः पटेल 'साहित्य मां वास्तवाद' लेखः सं. अमृतलाल याज्ञिक और अन्य 'साहित्य वाद' नवभारत साहित्य मन्दिर, अमदावाद, पृ. ८७-९०

४. महाराजदीनपाण्डेयः 'काक्षेण वीक्षितम्' समीक्षा पब्लिकेशन, दिल्ली, पृ.९६
५. त्रिपाठीराधावल्लभः 'पत्रमञ्जूषा' काव्यम्, संप्लवः, प्रतिभाप्रकाशनम्, दिल्ली २०००, पृ. ९
६. हर्षदेवमाधवः 'स्पर्शलज्जाकोमला स्मृतिः' पार्श्व पब्लिकेशन, २००७, पृ. १६
७. हर्षदेवमाधवः 'मृगया', पार्श्व पब्लिकेशन, १९९४ पृ. १६
८. सं. विद्याशङ्कर त्रिपाठी, प्रभुनाथ द्विवेदी 'संस्कृतवाग्विलासः द्वितीयोन्मेषः,' माया प्रकाशन, सन्तरविदासनगरम्, २००५, पृ. ७१-७२
९. अर्वाचीन संस्कृतम् ३०/३-४, पृ. १४
१०. प्रोत्र विद्याशङ्करत्रिपाठी, प्रो. प्रभुनाथ द्विवेदी 'संस्कृतवाग्विलासः' प्रथमोन्मेषः, मायाप्रकाशन, सन्तरविदासनगरम्, २००५ : पृ ४९
११. सं. नूतन जानी 'विश्वकविताः कविता तुलना' श्रीमती एन.डी. ठाकरसी विद्यापीठ, मुम्बई, २००५ः पृ. ११२